त्रयी वार्त्ता दण्डनीतिः प्रजा वर्णाश्रमेज्यया ।
शिष्टैराचर्य्यते यस्मात् शिष्टाचारः स शाश्वतः ॥
दानं सत्यं तपोऽलोभो विद्येज्या पूजनं दमः ।
अष्टौ तानि चरित्राणि शिष्टाचारस्य लक्षणम् ॥
शिष्टा यस्माच्चरन्त्येनं मनुः सप्तर्षयश्च ये ।
मन्वन्तरेषु सर्व्वेषु शिष्टाचारस्ततः स्मृतः ॥
श्रुतिस्मृतिभ्यां विहितो धर्म्मो वर्णाश्रमात्मकः ।
शिष्टाचारविरुद्धस्तु धर्म्मः स साधुसम्मतः ॥"
इति मात्स्ये १२० अध्यायः ॥

शिष्टिः, स्त्री, (शास + क्तिन् । "शास इदङ्हलोः ।" ६ ।४ । ३४ । इति उपधाया इः । ) आज्ञा । शासनम् । इत्यमरः ॥ (यथा, मनुः ।४ ।१६४ ।
"अन्यत्र पुत्रात् शिष्याद्वा शिष्ट्यर्थं ताडयेत्तु तौ ॥")

शिष्यः त्रि, (शिष्यतेऽसाविति । शास + "एतिस्तुशास्वृदृजुषः क्यप् ।" ३ । १।१०९ । इति क्यप् । "शास इदङ्हलोः ।"६।४।३४।इति इः । "शासवसीति" ।८।३।६०। इति षः ।) उपदेश्यः । तत्पर्य्यायः । छात्रः २ अन्तेवासी ३ । इत्यमरः ॥ अन्तेसत् ४ । अन्तेषदः ५ । यथा,—
"छात्रान्तेवासिशिष्यान्तेषद एकार्थता इमे ॥"
इति जटाधरः ॥

तस्य लक्षणं यथा,—
"वाङ्मनःकायवसुभिर्गुरुशुश्रूषणे रतः ।
एतादृशगुणोपेतः शिष्यो भवति नारद ॥
देवताचार्य्यशुश्रूषां मनोवाक्कायकर्म्मभिः ।
शुद्धभावो महोत्साहो बोद्धा शिष्य इति स्मृतः ॥"
इति दीक्षातत्त्वम् ॥

अपिच ।
"शान्तो विनीतः शुद्धात्मा श्रद्धावान् धारणक्षमः ।
समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो व्रती ।
एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा ॥"*॥
निषिद्धशिष्यलक्षणमाह ।
"पापिने क्रूरचेष्टाय शठाय कृपणाय च ।
दीनायाचारशून्याय मन्त्रद्वेषपराय च ॥
निन्दकाय च मूर्खाय तीर्थद्वेषपराय च ।
भक्तिहीनाय देवेशि न देया मलिनाय च ॥
गुरुता शिष्यता वापि तयोर्वत्सरवासतः ॥"
तथा चोक्तं सारसंग्रहे ।
"सद्गुरुः स्वाश्रितं शिष्यं वर्षमेकं परीक्षयेत् ।
वर्षैकेन भवेद्योग्यो विप्रो गुणसमन्वितः ॥
वर्षद्वयेन राजन्यो वैश्यस्तु वत्सरैस्त्रिभिः ।
चतुर्भिर्वत्सरैः शूद्रः कथिता शिष्ययोग्यता ॥"
इति तन्त्रसारः ॥*॥

अन्यच्च ।
"आचारे शासयेद्यस्तु स आचार्य्य उदाहृत ।
यस्त्वाचार्य्यपराधीनस्तद्वाक्यं शास्यते हृदि ।
शासने स्थिरवृत्तिश्च शिष्यः सद्भिरुदाहृतः ॥
एवं लक्षणसंयुक्तं शिष्यं सर्व्वगुणान्वितम् ।
अध्यापयेद्विधानेन मन्त्ररत्नमनुत्तमम् ॥"
इति पाद्मोत्तरखण्डे २५ अध्यायः ॥*॥

पुत्त्रशिष्ययोस्तुल्यत्वं यथा,—
"यथा पुत्त्रस्तथा शिष्यो न भेदः पुत्त्रशिष्ययोः ।
तर्पणे पिण्डदाने च पालने परिपोषणे ॥
यथाग्निदाता पुत्त्रश्च तथा शिष्यश्च निश्चितम् ।
इतीदं काण्वशाखायामुवाच कमलोद्भवः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६१ अध्यायः ॥

पुत्त्रशिष्याभ्यां विशेषो यथा,—
सनत्कुमार उवाच ।
"पुत्त्र एवास्मि देवेश यतः शिष्योऽस्म्यहं विभो ।
न विशेषोऽस्ति पुत्त्रस्य शिष्यस्य च पितामह ॥
ब्रह्मोवाच ।
विशेषः शिष्यपुत्त्राभ्यां विद्यते धर्म्मनन्दन ।
धर्म्मकर्म्मसमायोगे तथापि गदतः शृणु ॥
पुन्नाम्नो नरकात्त्राति पुत्त्रस्तेनेह गीयते ।
शेषपापहरः शिष्य इतीयं वैदिकी श्रुतिः ॥
सनत् कुमार उवाच ।
कोऽयं पुन्नामको देव नरकात्त्राति पुत्त्रकः ।
कस्माच्छेषं ततः पापं हरेच्छिष्यश्च तद्वद ॥"
इति वामने ५७ अध्यायः ॥
ब्रह्मोवाच ।
"अतः परं प्रवक्ष्यामि शेषपापस्य लक्षणम् ।
ऋणं देवर्षिभूतानां मनुष्याणां विशेषतः ॥
पितॄणाञ्च द्विजश्रेष्ठ सर्व्ववर्णेषु चैकतः ।
ओँकारादिनिवृत्तिश्च पापकार्य्यकृतिश्च या ॥
इत्यादिकं महापापं त्वगम्यागमनं तथा ।
घृतादिविक्रयं घोरं चण्डालादिप्रतिग्रहम् ॥
स्वदोषगोपनं पापं परदोषप्रकाशनम् ।
ईर्ष्याविद्धं वाक्यदुष्टं निष्ठुरत्वं षड़म्बरम् ॥
ढाकित्वं तालवादित्वं नाम्ना वाचाप्यधर्म्मजम् ।
मारणत्वमधार्म्मिक्यं नरकावहमुच्यते ॥
एतैः पापैश्च संयुक्तः पात्यते यदि शङ्करम् ।
स्नानाधिकमशेषेण शेषात् पापात् जयेत्ततः ॥
शारीरं वाचिकं यत्तु मानसं त्रिविधं तथा ।
पितृमातृकृतं यच्च कृतं यच्चाश्रितैर्नरैः ॥
ज्ञातिभिर्ब्बान्धवैश्चापि तस्मिन् जन्मनि धर्म्मज ।
तत्सर्व्वं विलयं याति कर्म्मणा सुतशिष्ययोः ॥
तस्मात् पुत्त्रश्च शिष्यश्च विधातव्यो विपश्चिता ।
श्रुतमर्थमभिध्याय शिष्यात् श्रेष्ठतरः सुतः ।
शेषात्तारयते शिष्यः सर्व्वत्रैव हि पुत्त्रकः ॥"
इति वामने ५८ अध्यायः ॥

शिह्लः, पुं, शिह्लकः । इति शब्दचन्द्रिका ॥

शिह्लकः, पुं, (शिह्ल एव । स्वार्थे कन् ।) गन्धद्रव्यविशेषः । शिलारसः । शिह्ला इति लोवान् इति च भाषा । तत्पर्य्यायः । कपिनामा २ कपिः ३ तैलम् ४ कृत्रिमम् ५ कपिलः ६ चला ७ तुरुष्कः ८ मुक्तिमुक्तः ९ पिण्डातः १० वरः ११ । इति रत्नमाला ॥ पिण्डकः १२ सिह्लः १३ यावनः १४ । इत्यमरः ॥ अस्यानुलेपनगुणाः ।
"शिह्लकः परमा मांसी देवदारु मुरा नखम् ।
सर्व्वेऽमी परमा लक्ष्मी रक्षोघ्ना ज्वरनाशनाः ॥"
रौक्ष्यघ्ना इति वा पाठः । इति राजवल्लभः ॥
अन्यत् तुरुष्कशब्दे द्रष्टव्यम् ॥

शी, ङ ल ञि स्वप्ने । इति कविकल्पद्रुमः ॥ (अदा०-आत्म०-अक०-सेट् । ङ ल, शेते । ञि, शयितोऽस्ति । मण्डपे शयामीति गणकृतानित्यत्वात् परस्मैपदे शपोऽलुगभावे चेति रमानाथः । वस्तुतस्तु शेते शयः पश्चात् शय इवाचरतीति क्वौ साध्यम् । इति दुर्गादासः ॥

शीः, स्त्री, (शी + क्विप् । ) शान्तिः । शयनम् । इति शब्दरत्नावली ॥

शीक, ऋ ङ सेके । सर्पे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ऋ, अशिशीकत् । ङ, शीकते । इति दुर्गादासः ॥

शीक, कि आमर्षे । सेके । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-सक०-सेट् ।) कि, शीकयति शीकति । आमर्शः स्पर्शः । तथा च ।
"चन्द्रावतीतरङ्गार्द्रा शीकयन्ति च यद्वपुः ।"
इति हलायुधः ॥
वायवः स्पृशन्ति इत्यर्थः । भट्टमल्लस्तु आमर्षण इति मूर्द्धन्यषमध्यं पठित्वा क्षमार्थमाह । इति दुर्गादासः ॥

शीकरं, क्ली, (शीक्यतेऽनेनेति । शीक + बाहुलकात् अरः ।) शरलद्रवः । इति मेदिनी ॥

शीकरः, पुं, (शीक्यतेऽनेनेति । शीक + बाहुलकात् अरः । इत्युज्ज्वलदत्तः ।३।१३१।) वातादिप्रेरितजलकणा । इत्यमरः ॥ (यथा, कुमारे ।१।१५ ।
"भागीरथीनिर्झरशीकराणां
वोढ़ा मुहुः कम्पितदेवदारुः ॥")
वायुः । इति मेदिनी ॥

शीघ्रं, क्ली, (शिङ्घति व्याप्नोतीति । शिघ व्याप्तौ + रक्प्रत्ययेन साधु ।) विलम्बाभावः । तत्पर्य्यायः । त्वरितम् २ लघु ३ क्षिप्रम् ४ अरम् ५ द्रुतम् ६ सत्वरम् ७ चपलम् ८ तूर्णम् ९ अविलम्बितम् १० आशु ११ । अव्ययाः शीघ्रवाचकाः यथा । स्राक् १२ झटिति १३ अञ्जसा १४ अह्नाय १५ सपदि १६ द्राक् १७ मंक्षु १८ । इत्यमरः ॥ तद्वैदिकपर्य्यायः । नु १ मक्षु २ द्रवत् ३ ओषम् ४ जीराः ५ जूर्णिः ६ शूर्त्ताः ७ शूघनासः ८ शीभम् ९ वृषु १० तूयम् ११ तूर्णिः १२ अजिरम् १३ भुरण्युः १४ शु १५ आशुः १६ प्राशुः १७ तूतुजिः १८ तूतुजानः १९ तुज्यमानासः २० अज्राः २१ साचिवित् २२ द्युगत् २३ ताजत् २४ तरणिः २५ वातरंहा २६ । इति षड्विंशतिः क्षिप्रनामानि इति वेदनिघण्टौ । २ । १५ ॥ लामज्जकम् । इति राजनिर्घण्टः ॥ (पुं, कुशवंशीयाग्निवर्णस्य पुत्त्रः । यथा, भागवते । ९ । १२ । ५ ।
"सुदर्शनोऽथाग्निवर्णः शीघ्रस्तस्य मरुः सुतः ॥")
शीघ्रविशिष्टे, त्रि । इत्यमरः ॥ (यथा, महाभारते । ३ । ६७ । ६ ।
"स त्वमातिष्ठ योगं तं येन शीघ्रा हया मम ।
भवेयुरश्वाध्यक्षोऽसि वेतनं ते शतं शताः ॥")